श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

चोलसिंहपुरं दोड्डयाचार्य कृतं

# ॥ श्री वेदान्तदेशिकवैभवप्रकाशिका स्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वेदान्तदेशिकवैभवप्रकाशिका स्तोत्रम् ॥

वाधूलश्रीनिवासार्य तनयं विनयोज्ज्वलम्।
प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवास महागुरुम्॥

श्रीनिवासमहाचार्य प्राप्तवेदान्तसंपदम्।
लक्ष्मणार्य दयापात्रं श्रीनिवासगुरुं भजे॥

कविवादिशिरोरत्नं कल्याणगुणभूषणम्।
विश्वामित्रान्वयाब्धीन्दुं वेदान्तगुरुमाश्रये॥ 1 ॥

वेङ्कटेशस्य सङ्कल्पात् विश्वामित्रकुलांबुधौ।
घण्टाऽवतीर्णा यन्मूर्त्या तं देशिकवरं भजे॥ 2 ॥

काञ्च्यां नभस्यश्रोणायां अनन्तार्यगुरोस्सुतः।
जातो यो जनभाग्येन श्रीमन्तं तमहं भजे॥ 3 ॥

जातकर्मादिकं सर्वं पिता यस्याकरोद् गुरोः।
तं वेङ्कटेशमनिशं तोतारम्बासुतं भजे॥ 4 ॥

अस्माकं भवसञ्चार शान्तये विबुधाधिपः।
पद्भ्यां चचार यो भूम्यां तं वन्दे वेङ्कटाधिपम्॥ 5 ॥

तृतीयाब्दे गुरोर्यस्य चूडाकर्माकरोत्पिता।
पुण्डरीकाक्षपौत्रं तं पुरुषश्रेष्ठमाश्रये॥ 6 ॥

अक्षराणि ततस्सर्वाण्याचार्याद् गुरुरग्रहीत्।
यस्तं वेङ्कटनाथार्यं वन्दे मतिमतां वरम्॥ 7॥

अनन्तार्यगुरुर्यस्य पितानन्तगुणोज्ज्वलः।
ब्रह्मोपदेशमकरोत् तं भजे ब्राह्मणोत्तमम्॥ 8॥

मातुलादखिलाम्नायान् मतिमानग्रहीच्च यः।
पुनरुच्चारणापेक्षारहितं तं गुरुं भजे॥ 9॥

शुद्धां कन्यां शुभाचारां तुल्यलक्षण संयुताम्।
उपयेमे विधानेन यो गुरुस्तं भजाम्यहम्॥ 10॥

मीमांसा तर्कशब्दादि शास्त्राण्यपि च मातुलात्।
अवाप विंशत्यब्दे यः तं विद्यानिधिमाश्रये॥ 11॥

आत्रेयरामानुज देशिकेन्द्रात्
अवाप्य वेदान्तयुगं पुनर्यः।
मन्त्रञ्च गारुत्मतमाप तस्मात्
तमाश्रये वेङ्कटदेशिकेन्द्रम्॥ 12॥

काञ्च्या विनिष्क्रम्य ततो महात्मा
संप्राप्य नागेन्द्रपुरं गुरुर्यः।
ध्यायन् गरुत्मन्तमुवास तस्मिन्
तं वेदचूडागुरुमाश्रयामः॥ 13॥

प्रीतेन सम्यक् गरुडेन तेन
यस्योपदिष्टो हयवक्त्रमन्त्रः।
तं भक्तिवैराग्यगुणोपपन्नं
श्रीमन्तमीडे श्रुतिशेखरार्यम्॥ 14॥

यस्त्वौषधाद्रौ नृहरेस्समीपे
ध्यायन् हयग्रीवपदाब्जमन्त्रः।
आह्लादशीतांबुविलोचनोऽभूत्
आम्नायचूडागुरुमाश्रये तम्॥ 15॥

स्थित्वा पुरो यस्य गुरोः स्ववक्त्र
लालासुधां वाजिमुखः प्रसन्नः।
विश्राणयामास विबोधहेतुं
तं वेदचूडार्यमहं प्रपद्ये॥ 16॥

हयाननस्तोत्रमथाभिरामं
पक्षीन्द्रपञ्चाशतमप्यपूर्वाम्।
मुदा वितेने विदुषां वरो यः
तं वेङ्कटार्यं सततं स्मरामि॥ 17॥

अथाच्युतस्य स्तुतिमद्भुतार्थां
पञ्चाशतं देवपतेश्च दिव्याम्।
तदाज्ञया योऽकृत सूरिवर्यः
तं वेङ्कटाधीशमहं प्रपद्ये॥ 18॥

त्रिरत्नगाथां नवरत्नमालां
विचित्रडोळाविषयाञ्च गाथाम्।
चकार यः कन्दुकमुख्यगाथां
तमाश्रये तत्त्वविदग्रगण्यम्॥ 19॥

चक्रे गुरुर्यो घुटिकाख्यगाथां
गाथां कुबेराक्षि विनोदनार्थाम्।
गाथाञ्च रम्यां परिहासयोग्यां
तं भावये सर्वकलासु दक्षम्॥ 20॥

तत्रैव चक्रे परपक्षभङ्गं
    रम्यं विचित्रं रघुवीरगद्यम्।
स्तोत्रं च यो गोपपतेरवोचत्
    तं वेङ्कटेशं शरणं प्रपद्ये॥ **21**॥

नागेन्द्रपुर्यां स्वयमेव खात्वा
    प्रहिं प्रशस्तां तदभिज्ञमान्यः।
यस्सर्वतन्त्रेषु धुरन्धरत्वं
    प्रख्यापयामास गुरुं तमीडे॥ **22**॥

तस्माद् गुरुर्गोपपुरीमवाप्य
    देहळ्यधीशं सुभगैर्वचोभिः।
स्तुत्वा च काञ्चीं प्रविवेश यस्तं
    वन्देय वादिद्विरदौघसिंहम्॥ **23**॥

क्रमेण देवं कमलासहायं
    प्रणम्य चागत्य गुरुः स्वगेहम्।
वरां वितेने वरदस्तुतिं यः
    विभावये वेदशिरोगुरुं तम्॥ **24**॥

श्रीचिह्नमालां शरणागतेर्यः
    गाथां शुभां द्वादशनामगाथाम्।
दिने विधेयामपि वैष्णवानां
    चर्यां वितेने शरणं भजे तम्॥ **25**॥

हस्तिगिरिवैभवं यो गाथारूपार्थपञ्चकं रम्यम्।
वेङ्कटनाथाचार्यो व्यतनुत तमहं विभावये नित्यम्॥ **26**॥

शुभां गभीरां स्तुतिमष्टबाहोः
    यथोक्तकारिस्तुतिमप्युदाराम्।
कामासिकामर्त्यहरेः स्तुतिञ्च
    चक्रे गुरुर्यस्तमहं प्रपद्ये॥ **27**॥

दीपप्रकाशस्तुति दीपभासा
    दूरीकृतो येन हृदन्धकारः।
अस्माकमाम्नायशिरोगुरुं तं
    आदित्यवर्णं भजतां मनो मे॥ **28**॥

समरपुङ्गवसंस्तुतिमद्भुतां
    अकृत यो भुवि वेङ्कटदेशिकः।
शमदमादिगुणैकविभूषणं
    कविमृगेन्द्रगुरुं कलयामि तम्॥ **29**॥

हेतिराजविषयां स्तुतिं व्यधात्
    तस्य हेतिविषयां स्तुतिञ्च यः।
साधुबृन्द विनुतं तमाश्रये
    वेदमौळियुगदेशिकोत्तमम्॥ **30**॥

काले गुरुः प्रणिपतन् करिशैलनाथं
    काञ्चीपुरे सुखमुवास कवीडितो यः।
सद्भ्यः सदा प्रकटयन् सकलार्थजातं
    तं वेङ्कटेशगुरुवर्यमहं प्रपद्ये॥ **31**॥

निष्क्रम्य काञ्चीनगरात् कदाचित्
    शिष्यैः शुभाचारयुतैः सुधीभिः।
श्रीवेङ्कटक्ष्माभृतमाप यस्तं
    सेवे त्रयीशेखरदेशिकेन्द्रम्॥ **32**॥

स्नात्वा सम्यक् सह बुधवरैः स्वामिनः पुष्करिण्यां
धृत्वा वस्त्रद्वयमथ वरानूर्ध्वपुण्ड्रान् दधानः।
श्रीशं देवं वृषगिरिपतिं प्राणमद्यो विनीतः
त्रय्यन्तार्यं कविकरिघटा पञ्चवक्त्रं भजेऽहम्॥ 33॥

पादादिकेशं प्रणिपत्य सम्यक्
श्रीवेङ्कटेशं श्रितपारिजातम्।
प्रीतेन देवेन कृपाकटाक्षैः
कटाक्षितो यस्तमहं भजामि॥ 34॥

श्रेयो जनानामुपपादयिष्यन्
श्रीवेङ्कटाधीश दयास्तुतिं यः।
दिव्यां दयावारिनिधिर्वितेने
तं वेङ्कटेशं प्रणमाम्यभीक्ष्णम्॥ 35॥

तत्र स्थितानां विदुषां हितार्थान्
उपादिशद्यः कविवादिसिंहः।
तं ख्यातिपूजाविमुखं दयाळुं
त्रयीशिरोदेशिकवर्यमीडे॥ 36॥

स्थानानि विष्णोस्तत औत्तराणि
गत्वा गुरुर्यः प्रणिपत्य सम्यक्।
तत्रत्यसत्त्वस्थजनान् समीक्ष्य
तेषां हितार्थानवदत्तमीडे॥ 37॥

रम्याण्ययोध्या प्रभृतीनि विष्णोः
स्थानानि काञ्च्या न समानि भूम्याम्।
इत्युच्चरन् यः पुनरेव काञ्चीं
भेजे भजे तं परवादिसिंहम्॥ 38॥

कवितार्किककेसरिणा काञ्च्यां वसता कुदृष्टिसन्यासी।
वादे विनिर्जितोऽभूत् येन तमीडे त्रयीशिरस्सूरिम्॥ **39**॥

द्रोहं चिकीर्षुरस्मै महोदरत्वप्रदं पपौ सोम्भः।
तज्ज्ञो गुरुरपि विदधे स्तम्भेच्छिद्रं यथा स्रवेदम्भः॥ **40**॥

सम्यक् श्रुत्वा वैभवं तस्य सूरेः
सत्कारार्थं पत्रिकां प्रीतियुक्तः।
विद्यारण्यः प्रेषयामास यस्मै
त्रय्यन्तार्यं सन्ततं भावये तम्॥ **41**॥

सिलं किमित्यादिमुखान् गुरुर्यः
श्लोकान् शुभान् प्रेषयति स्म तस्मै।
धने विरक्तं तृणतुल्यभूपं
त्रय्यन्तसूरिं शरणं प्रपद्ये॥ **42**॥

विद्यारण्यो विविधं वेङ्कटसूरेर्विशोध्य वैराग्यम्।
यं विष्णोरवतारं मेने सेवे तमागमान्तगुरुम्॥ **43**॥

श्रीरङ्गेन्दोः शासनं सूरिवर्यैः
यस्मै शीघ्रं प्रेषितं वादिरोधे।
तस्मै भक्तिं कुर्वते ये नरास्तान्
धन्यान् सेवे संस्तुवे चिन्तयामि॥ **44**॥

रङ्गपतिशासनं यो धृत्वा शिरसा तदैव गुरुवर्यः।
रङ्गं प्रति प्रतस्थे रम्यगुणं तं निरन्तरं सेवे॥ **45**॥

श्रीरङ्गमासाद्य ततः सुरम्यं
कवेरजायामवगाह्य सम्यक्।

दधौ गुरुर्यो वसनं मनोज्ञं
दिव्योर्ध्वपुण्ड्रानपि तं भजामि ॥ **46** ॥

सेवाक्रमेण प्रणिपत्य देवं
श्रीरङ्गनाथं कमलासहायम्।
तद्ध्यानसोपानमुवाच यस्तं
त्रय्यन्तसूरिं सततं स्मरामि ॥ **47** ॥

रङ्गाधिराजेन कृपाकटाक्षैः
कटाक्षितो यः कविवादिसिंहः।
आस्थानमापाखिलसूरिवर्यैः
तमाश्रये देशिकसार्वभौमम् ॥ **48** ॥

जित्वा तदा वादिनमागमान्त -
गुरुर्वितेने शतदूषणीं यः।
तन्नामसङ्कीर्तन तत्परांस्तान्
समाश्रये सर्वजनाभिपूज्यान् ॥ **49** ॥

प्रीतेन रङ्गपतिना बहुमानपूर्वं
वेदान्तयुग्ममनिशं प्रतिपादयानः।
अत्रैव सौम्य वस नित्यमितीरितो यः
तं वेदमौळिगुरुमन्वहमाश्रयामः ॥ **50** ॥

रङ्गेशस्य पदाम्बुजं प्रणिपतन् धृत्वा तदाज्ञां शुभां
त्रय्यन्तद्वयमेव सर्वविदुषां सम्यग्वदन्नादरात्।
कञ्चित्कालमुवास रङ्गनगरे यो वेङ्कटार्यः सुधीः
तं वादिद्विरदौघसिंहमनघं भक्त्या प्रपद्येऽन्वहम् ॥ **51** ॥

प्रख्यापयन् निगममौळियुगं बुधानां
तद्रक्षणाय विविधाः कुरु सत्कृतीस्त्वम्।
इत्युक्तवान् यतिपतिर्गुरवे तु यस्मै
स्वप्ने तमद्भुतगुणं शरणं प्रपद्ये॥ **52**॥

रङ्गपतिना सभायां दृष्ट्वा व्याख्यानकौशलं सूरेः।
वेदशिरोदेशिकता दत्ता यस्मै तमाश्रये नित्यम्॥ **53**॥

तत्प्रेयस्या सर्वतन्त्रेषु दाक्ष्यं
दत्तं यस्मै प्रीतया देशिकाय।
तस्मै भक्त्या कुर्वते ये तु सेवां
तद्दासानां दास्यमभ्यर्थयेऽहम्॥ **54**॥

सकलकुशलहेतोः सद्भिरभ्यर्थ्यमानः
सरसिजनिलयायाः स्तोत्रमुर्व्याश्च देव्याः।
व्यतनुत मधुरार्थं वेङ्कटेशो गुरुर्यः
शमदमगुणभूषं तं शरण्यं भजेऽहम्॥ **55**॥

गोदास्तुतिं गुणाढ्यां विदुषां प्रीत्यै विनिर्ममे यस्ताम्।
वेदान्तसूरिवर्यं वेङ्कटनाथं विभावये नित्यम्॥ **56**॥

दशावतारस्तुतिमद्भुतां यो
दिव्यां गभीरां जनरक्षणार्थम्।
विनिर्ममे वेङ्कटनाथवर्यः
तं सर्वविद्याजलधिं भजेऽहम्॥ **57**॥

शमधनैर्विबुधैर्मुहुरर्थितः
सकलतन्त्रधुरन्धरदेशिकः।

यतिपुरन्दरसप्ततिमादरात्
अकृत यस्तमहं शरणं भजे॥ **58**॥

विमलगुणविशिष्टं वीतदोषं विचित्रम्
सहृदयहृदि धार्यं तत्त्वमुक्ताकलापम्।
सकलकुशलहेतुं सर्वतन्त्रस्वतन्त्रः
समतनुत गुरुर्यस्तं भजे साधुसेव्यम्॥ **59**॥

सर्वार्थसिद्धिहेतुं सर्वज्ञो यस्समस्तजीवानाम्।
सर्वार्थसिद्धिमनघां चक्रे यस्तं समाश्रये सततम्॥ **60**॥

तत्त्वालोकनसाधनं तनुभृतां सन्नीतिसिद्धाञ्जनम्
चक्रे यः कविवादिपञ्चवदनः तं वेदचूडागुरुम्।
ये केचिन्मनुजा भजन्ति भुवने तेषामहं धीमताम्
वीटीचेट इति प्रहृष्टमनसा वीथीषु सङ्घुष्यताम्॥ **61**॥

निगमशिखरानुरोधात् नीतेश्शुद्धिर्विनिर्मिता गुरुणा।
कविकथकपञ्चवक्त्रं कलये करुणा महोदधिं तमहम्॥ **62**॥

यो मीमांसां सेश्वरां व्याजहार
तस्या रम्यां पादुकां वेङ्कटार्यः।
सद्भिः सेव्यां तत्त्वटीकाञ्च चक्रे
तत्पादाब्जं सन्ततं चिन्तयामि॥ **63**॥

अधिकरणदर्पणं यो व्यतनुत विमलं विपश्चितां प्रीत्यै।
वेङ्कटनाथमुपासे विबुधवरं तं विचित्रशक्तियुतम्॥ **64**॥

संसारसन्ताप विषण्णजन्तून्
समीक्ष्य सर्वान् कृपया गुरुर्यः।

चकार सारावलिदुग्धराशिं
तत्पादपद्मं भजतां मनो मे ॥ **65** ॥

कुमतितमोजालं यो हर्तुं तात्पर्यचन्द्रिकां चक्रे।
विष्णुपदसंश्रयं तं वेङ्कटचन्द्रं कलानिधिं कलये ॥ **66** ॥

हृदयङ्गमा बुधानां ईशावास्यत्रयीशिरोव्याख्या।
विहिता येन भजे तं वेङ्कटनाथं विपश्चितां प्रवरम् ॥ **67** ॥

गम्भीरां यः पञ्चकालव्यवस्था
हेतुं चक्रे पञ्चरात्रस्य रक्षाम्।
कुर्वाणं तं पञ्चकालक्रमार्चां
सेवे सूरिं पञ्चवक्त्रं कवीनाम् ॥ **68** ॥

यामुनमुनिना रचितं गीतासारं गभीररमणीयम्।
व्याचष्ट वेङ्कटार्यः विमलमतिं तं विपश्चितं कलये ॥ **69** ॥

कुमतिजनकुयुक्त्या क्लृप्तमुर्व्यां कृपालुः
शमयितुमुपरोधं शङ्खचक्राङ्कनादेः।
सकलजनमनोज्ञां सच्चरित्रस्य रक्षां
व्यतनुत गुरुवर्यो यस्तमीडे कवीन्द्रम् ॥ **70** ॥

बाह्यान्तरङ्गचौरैः बाधां जातां निवर्त्य बुधवर्यः।
निक्षेपस्य समग्रां रक्षां चक्रे नमामि तं नित्यम् ॥ **71** ॥

रक्षां समग्रां विदुषां विधातुं
रक्षां रहस्यस्य विनिर्ममे यः।
तं वादिहंसाम्बुदसूरिशिष्यं
वन्दे गुरुं वादिकवीन्द्रसिंहम् ॥ **72** ॥

न्यासतिलकं वितेने रङ्गनरेन्द्रप्रियावहं रम्यम्।
तस्य दशकं च यस्तं त्रय्यन्तार्यं समाश्रये सततम्॥ 73॥

विवृतो वेङ्कटविदुषा विंशत्या येन विधिविदा न्यासः।
तत्पादपद्मविमुखा रावणचैद्यानुसारिणो मनुजाः॥ 74॥

भूम्या मानमवोचद् बुधजनहृद्यं बुधाधिपः सूरिः।
तद्विवृतिं च वितेने यस्तं वन्दे यतीन्द्रपदभक्तम्॥ 75॥

यतिपतिफणितीनां भावमेवं विवृण्वन्
जयतु निगमचूडादेशिकेन्द्रो दयाळुः।
इति विबुधवरैर्यः सम्यगभ्यर्थितस्तं
शरणमशरणोऽहं संश्रये साधुवन्द्यम्॥ 76॥

कदाचिदक्षोभ्यमुनेश्च विद्या -
रण्यस्य जातं बहुळं विवादम्।
विलिख्य भूपो विबुधाय यस्मै
संप्रेषयामास तमाश्रयेऽहम्॥ 77॥

तत्त्वमसिनाऽसिना तं विद्यारण्यं मुनिस्तदाक्षोभ्यः।
अच्छिनदित्यवदद्यः तं सेवे तत्त्वनिर्णये चतुरम्॥ 78॥

कार्या न भाषाकृतगीतिरत्र
तत्कल्पकार्चाश्च न पूजनीयाः।
इत्युक्तपक्षं नृपतेस्समक्षं
यः प्राक्षिपत् तं गुरुवर्यमीडे॥ 79॥

जित्वा तु तान् भूपसमक्षतः श्री
रङ्गेश्वरस्याध्ययनोत्सवादीन्।

आकल्पमव्याहतमादिशद्यः
    तं वेदचूडागुरुमाश्रयामि ॥ **80** ॥

आगत्य कृष्णमिश्रो विजितो विबुधेन वीतदर्पोऽभूत्।
येन कविसिंहगुरुणा तेन सनाथा वयं भृशं सुखिनः ॥ **81** ॥

समाश्रितानां भववासतेयीं
    सङ्क्षेप्तुमुर्व्यां श्रुतिशेखरार्यः।
सङ्कल्पसूर्योदयमद्भुतं यः
    विनिर्ममे निर्ममामाश्रये तम् ॥ **82** ॥

जित्वा कविं डिण्डिमसार्वभौमं
    कृत्वा च कृष्णाभ्युदयं मनोज्ञम्।
स्तुतस्तदा तेन गुरूत्तमो यः
    तमाश्रये सर्वकलास्वतन्त्रम् ॥ **83** ॥

ततो विनिष्क्रम्य गुरुर्वनाद्रि -
    मुख्यानि तान्यावसथानि विष्णोः।
नत्वा शठारिं च निशाम्य सेतुं
    रङ्गं पुनर्योऽभजदाश्रये तम् ॥ **84** ॥

श्रीकुम्भघोणप्रभृतीनि विष्णोः
    स्थानानि चोळेषु मनोहराणि।
गत्वा प्रणम्य श्रुतिशेखरार्यः
    यः प्राप काञ्चीनगरं भजे तम् ॥ **85** ॥

तत्र च कश्चिद्विजितो मन्त्रविदा येन सर्पसञ्जीवी।
तन्नाम चिन्तयामो येन जनानां द्रवन्ति भवसर्पाः ॥ **86** ॥

विष्णुरथदण्डकं यो वेङ्कटनाथो विनिर्ममे रम्यम्।
वेदान्तदेशिकं तं विमलगुणाढ्यं विभावये हृदये॥ 87॥

निष्क्रम्य देशिकेन्द्रो रङ्गं द्रष्टुं समुत्सुको भूयः।
मध्ये तु वैश्यशरणे न्यवसद्यस्तं निरन्तरं कलये॥ 88॥

तदा निशायां चणकान्मदीयान्
भुङ्क्ते वळर्क्षस्तुरगस्त्वदीयः।
त्रैवर्णिकेनैवमितीरितो यः
तमाश्रये साधुनुतं शरण्यम्॥ 89॥

समर्पितं तेन पयो विशुद्धं
निवेद्य देवाय हयाननाय।
ततः स्वयं स्वीकृतवान् गुरुर्यः
तदङ्घ्र्युपाया वयमेव धन्याः॥ 90॥

गत्वा रङ्गपुरीं यो नत्वा रङ्गेशमागमान्तार्यः।
स्वस्य गृहे न्यवसत् तं सततं सेवे शठारिपदसक्तम्॥ 91॥

सद्भिः सादरमर्थितः शमधनैः श्रीमान् दयावारिधिः
तत्त्वानां चुळकं रहस्यचुळकं चक्रे सतां गुप्तये।
तत्त्वानां पदवीं रहस्यपदवीमप्यद्भुतां यो विभुः
तं वन्दे कविवादि कुञ्जरघटा कण्ठीरवं देशिकम्॥ 92॥

तत्त्वनवनीतयुक्तं नवनीतमुषो रसावहं रम्यम्।
येन गुरुणा रहस्यत्रय नवनीतं कृतं भजे तमहम्॥ 93॥

चकार तत्त्वत्रयमातृकां यः
रम्यां रहस्यत्रयमातृकां च।

स एव माता च पिता च बन्धुः
मित्रं गुरुर्मे सकलं च सूरिः ॥ **94** ॥

रत्नावलिं वितेने तत्त्वानां यस्तमोपहां तस्याः ।
व्याख्याञ्च वेङ्कटार्यः तस्य कृपामेव संस्तुवे सततम् ॥ **95** ॥

रम्यां रमावल्लभनित्यहृद्याम्
रहस्यरत्नावलिमप्यपूर्वाम् ।
व्याख्यानरूपं हृदयं च तस्याः
चकार यस्तं कलये कृपालुम् ॥ **96** ॥

त्रियुगकुहनापोत्री देवो दयामृतवारिधिः
शमितजनताशोकं श्लोकद्वयं यदुदाहरत् ।
अकृत भुवि तद्व्याख्यारूपं रहस्यशिखामणिं
शमदमनिधिर्यस्तं सेवे कवीन्द्रशिखामणिम् ॥ **97** ॥

अञ्जलिवैभवमवदत् विबुधमुदे यो विपश्चितां प्रवरः ।
त्रय्यन्तसूरिवर्यः तस्मै कलयेऽहमञ्जलिं सततम् ॥ **98** ॥

रम्यं प्रधानशतकं निर्ममविबुधैर्निरन्तरं सेव्यम् ।
यः प्राह वेङ्कटार्यः तमहं सेवे प्रधानगुरुवर्यम् ॥ **99** ॥

भयावर्ते भीमे भ्रममुपगतानां प्रतिपदं
जनानां रक्षार्थं जगति गतिमन्यामविदुषाम् ।
प्रकृष्टां यश्चक्रे परमपदसोपानपदवीं
प्रपद्ये तं वादिद्विरदपृतनासिंहमनघम् ॥ **100** ॥

अभयप्रदानसारं व्यतनुत वेदान्तदेशिको यस्तम् ।
अभयप्रदं नतानामहमुपसेवे भयप्रदं कुदृशाम् ॥ **101** ॥

आरभ्याद्यं श्रीधरं देशिकानां
    चक्रे रम्यां संप्रदायस्य शुद्धिम्।
सत्त्वस्थानां श्रेयसे देशिको यः
    त्रय्यन्तार्यं संस्तुवे वेङ्कटेशम्॥ **102** ॥

उपकारपरम्परां हरेर्यः
    प्रथयामास सतां समाश्रितानाम्।
अपकारपरेऽपि सर्वजन्तौ
    उपकारान् कलयन्तमाश्रये तम्॥ **103** ॥

सकलजनरक्षणार्थं सरसं यः सारसङ्ग्रहं व्यतनोत्।
प्रवरं च देशिकानां कलये परवादिपञ्चवक्त्रं तम्॥ **104** ॥

अभिगमनमुखैः यः पूजयन् देशिकेन्द्रः
    श्रितविवशमुदारं श्रीपतिं रङ्गपुर्याम्।
स्वपदनतजनानां स्वप्रबन्धान् विवृण्वन्
    न्यवसदखिलवादिध्वान्तभानुं भजे तम्॥ **105** ॥

ब्रह्मतन्त्रचतुराय योगिने
    सर्वतन्त्रचतुरो गुरूत्तमः।
वेदमौळियुगळं ह्युपादिशत्
    वादिसिंहमनघं तमाश्रये॥ **106** ॥

काञ्च्यां ततः कञ्चन कोशमत्तं
    मतं यतीशस्य च दूषयन्तम्।
यो ब्रह्मतन्त्रे चतुरोऽजयत् तं
    तादृक्षशिष्यं गुरुमानतोऽस्मि॥ **107** ॥

त्रिंशद्वारं श्रावितं येन भाष्यं
स्वस्मिन् सम्यक् भक्तिभाजां जनानाम्।
प्रज्ञासिन्धुं पङ्कजाक्षार्यपौत्रं
तं वेदान्ताचार्यमीडे सदाऽहम्॥ **108** ॥

शिरसा हरिदासानां पदरक्षां यो दधार गुरुवर्यः।
दुरितनिवर्तनदक्षा तत्पदरक्षा तु मम शिरोरक्षा॥ **109** ॥

यो देशिकः कदाचित् स्वप्ने वरदस्य नियमनात् पुत्रम्।
लेभे रम्यगुणाढ्यं सेवेऽनन्तार्यसूरितनयं तम्॥ **110** ॥

रोहिण्याख्ये श्रावणे मासि चर्क्षे
जातस्यार्यस्तस्य पुत्रस्य रङ्गे।
चक्रे सम्यग् जातकर्मादिकं यः
तं सेवेऽहं वेदचूडार्यसूरिम्॥ **111** ॥

श्राद्धे पितुर्यस्य गुरोः कदाचित्
प्रीतिप्रकर्षेण तुरङ्गवक्त्रः।
अभुङ्क्त शुद्धानि हवींषि साक्षात्
तमाश्रयेऽत्यद्भुतभक्तियुक्तम्॥ **112** ॥

येनोपनीतो गुरुणा कुमारः
यस्मादवापाखिलवेदजातम्।
तस्मै नरा ये रचयन्ति भक्तिं
तेषां पदाब्जे प्रवणं मनो मे॥ **113** ॥

अवाप्य यस्मात् वरदार्यनामा
सूरिः समस्तान्यपि शास्त्राणि।

यतीन्द्रसिद्धान्तजयध्वजोऽभूत्
तं वेङ्कटार्यं ससुतं भजेऽहम् ॥ **114** ॥

काञ्चीप्रदेशादुपजग्मिवांसं
विवित्सया वीक्ष्य वटुं कृपातः।
वित्तं रमोपास्तिवरोपलब्धं
तस्मै ददौ यस्तमहं प्रपद्ये ॥ **115** ॥

धनानि शिष्यैस्सह तण्डुलेन
दत्तानि देव्या सह देशिकेन्द्रः।
दृष्ट्वा स्वगेहात् बहिरक्षिपद्यः
समाश्रये तं समलोष्टरुक्मम् ॥ **116** ॥

संप्रार्थितः संसदि सूरिवर्यैः
पादावनिं रङ्गपतेर्निशायाम्।
पद्यैः सहस्रैः गुरुरस्तुवीद्यः
तं भावयेऽहं कविसार्वभौमम् ॥ **117** ॥

रङ्गाधिपेन सम्यक् श्रुत्वा पादावनिस्तुतिं प्रीत्या।
कवितार्किकसिंहत्वं दत्तं यस्मै गुरूत्तमं सेवे ॥ **118** ॥

ग्रन्थैश्चतुस्सप्ततिभिः सहस्रैः
चतुः सहस्रार्थ विशेषयुक्तैः।
यः षड्सहस्रस्य चकार वृत्तिं
तं देशिकं नौमि शतं सहस्रम् ॥ **119** ॥

मुनिवाहनस्य सुकवेः सूक्तेर्व्याख्यां सुधामयीं सुभगाम्।
यो देशिको वितेने योगविदं तं विभावये हृदये ॥ **120** ॥

मधुरकविदिव्यसूक्तेः व्याख्यारूपं य एष गुरुवर्यः।
मधुरकविहृदयमूचे तमहं वन्देय मधुरकविवर्यम्॥ **121**॥

सारं गुरुर्यश्शठकोपसूक्तेः
तात्पर्यरत्नावलिमद्भुतार्थाम्।
विनिर्ममे निर्ममनित्यधार्याम्
विभावये तं हृदि वेङ्कटेशम्॥ **122**॥

सङ्गृह्य देशिकेन्द्रो हरिपदपूजाक्रमं वितेने यः।
तत्पदपद्ममुपासे विबुधजनानां शुभं शिरःकुसुमम्॥ **123**॥

चक्रे प्रबन्धसारं द्रामिडनिगमान्ततत्त्वदर्शी यः।
आहारनियमगाथां आगमचूडार्यमाश्रये सततम्॥ **124**॥

मूलमनुसङ्ग्रहं यः चरमश्लोकार्थसङ्ग्रहं सूरिः।
द्वयसङ्ग्रहं च रम्यं गाथारूपं चकार तं सेवे॥ **125**॥

गीतासङ्ग्रहगाथा रचिता विदुषां रसावहा येन।
यज्ञोपवीतपद्यं रमणीयगुणं तमाश्रये नित्यम्॥ **126**॥

दशरथनृपसूनोः हृद्यमत्यद्भुतं यः
कविकथकमृगेन्द्रः सर्वतन्त्रस्वतन्त्रः।
अतनुत रमणीयं हंससन्देशरत्नं
शरणमिह भजे तं शान्तिवात्सल्यसिन्धुम्॥ **127**॥

सुगुणा सुभाषितानां माला रचिता महात्मनां प्रीत्यै।
निर्ममसुहृदा विदुषा निगमान्तगुरुं भजामि तं नित्यम्॥ **128**॥

तत्त्वार्थसन्देशयुतं वितेने
रहस्यसन्देशमतीव रम्यम्।

व्याख्यां च यो माधवसूनुरक्षा -
हेतोस्तमार्यं शरणं भजेऽहम् ॥ **129** ॥

कृत्वापराधं कृतिनेऽपि यस्मै
दुर्वर्णतां प्राप स लक्ष्मणार्यः।
पीत्वा शुभं यस्य पदाम्बु पश्चात्
सुवर्णतां प्राप तमाश्रयेऽहम् ॥ **130** ॥

भाष्यप्रकाशिकां तां सङ्कटकाले सुदर्शनः सूरिः।
प्रादाद्यस्मै कृतिने सेवे तं वेदचूडिकासूरिम् ॥ **131** ॥

तान्तु गृहीत्वा रात्र्यां तत्तनयाभ्यां समं कथञ्चिद्यः।
तस्मात् गुरुः प्रतस्थे तमहं सेवे समस्तजनमित्रम् ॥ **132** ॥

सत्यमङ्गलमवाप्य देशिको
देवराजपदसन्निधौ नतः।
योऽवसद् बुधजनाधिपस्स्तुतैः
तं भजे कविमृगेन्द्रमन्वहम् ॥ **133** ॥

कृत्वोपनीतौ विधिवत् कुमारौ
सर्वाणि शास्त्राण्यपि देशिकेन्द्रः।
उपादिशद्यः कृपया तयोस्तं
विभावये वेङ्कटदेशिकेन्द्रम् ॥ **134** ॥

श्रीभाष्यटीका सुभगा तदानीं
संरक्षिता येन गुरूत्तमेन।
प्रवर्तिता सन्नतशिष्यवर्गे
पदाम्बुजं तस्य शुभं प्रपद्ये ॥ **135** ॥

गत्वा ततो यादवभूधरेन्द्रं
स्नात्वा च कल्याणसरोवरे यः।
दधार रम्यान् गुरुरूर्ध्वपुण्ड्रान्
दयानिधिं तं शरणं भजेऽहम्॥ **136** ॥

पूर्वं यतीन्द्रं प्रणिपत्य पश्चात्
नारायणं चापि रमासमेतम्।
तत्सेवया हृष्टमनाः गुरुर्यः
तत्पादपद्मं प्रणतोऽस्मि नित्यम्॥ **137** ॥

तत्रैव तस्मै यतिराजवीक्षा -
पात्राय पुत्राय च हर्षयुक्तः।
दिव्यप्रबन्धार्थमुपादिशद्यः
तं वेदचूडागुरुवर्यमीडे॥ **138** ॥

आशास्य देशस्य तदा समृद्धिं
आम्नायचूडागुरुसार्वभौमः।
पूर्वोषितं स्थानमवाप यस्तं
पूतं बुधानां प्रवरं भजेऽहम्॥ **139** ॥

अभीतिहेतोः स्तुतिमद्भुतार्थां
रम्यां गभीरामतनोत् गुरुर्यः।
तद्भक्तिपूता मनुजाः पृथिव्यां
महानुभावा मम वंशनाथाः॥ **140** ॥

जित्वा तुरुष्कान् भुवि गोप्पणेन्द्रः
रङ्गाधिपं स्थापितवान् स्वदेशे।
इत्येवमाकर्ण्य गुरुः कवीन्द्रः
हृष्टोऽभवद्यस्तमहं प्रपद्ये॥ **141** ॥

ततः स्वदेव्या तनयेन साकं
शिष्यैरनेकैः सह देशिको यः।
उपागमद्रङ्गपुरीमुदारां
तं वादिसिंहं प्रणमामि नित्यम्॥ **142** ॥

प्रणम्य रङ्गाधिपमात्मगेहं
संप्राप्य वेदान्तयुगं समग्रम्।
प्रवर्तयन् भक्तिमतां बुधानां
प्रीतो बभौ यस्तमहं भजामि॥ **143** ॥

कीलकाब्दे धनुर्मासे पञ्चम्यां शुक्लपक्षके।
तत्तारे शिल्पिराजं तमजयद्देशिकोत्तमः॥ **144** ॥

पीठे स्वकृतके श्लिष्टुं विग्रहं तं तितक्षति।
शिल्पिराजे समभवत् कपोले रुधिरं गुरोः॥ **145** ॥

तं शिल्पिराजं कविसार्वभौमो
जित्वा तदा विग्रह आविरासीत्।
शिल्पार्थसाराख्यमपूर्वशास्त्रं
चक्रे गुरुर्यस्तमहं प्रपद्ये॥ **146** ॥

यः प्रीत्या रङ्गनाथस्य ज्ञानमुद्रां च पुस्तकम्।
अवाप चिह्नभूतं तं वन्दे वेदान्तदेशिकम्॥ **147** ॥

शुद्धां गभीरां सुमनो निषेव्यां
रम्यां रहस्यत्रयसारगङ्गाम्।
उत्पादयामास कृपानिधिर्यः
तं वेङ्कटेशं सततं भजेऽहम्॥ **148** ॥

संप्रीणनार्थं शरणागतानां
    विनिर्मितं वेङ्कटदेशिकेन।
भवान्धकारक्षपणप्रवीणं
    सेवे रहस्यत्रयसारदीपम्॥ **149** ॥

तद्विषये जातानां कविकरिसिंहः समस्तशङ्कानाम्।
व्यतनुत यः परिहारं वेदान्तार्यं भजामि तं नित्यम्॥ **150** ॥

यः सारभूतवेदी सारज्ञानां मुदे गुरुप्रवरः।
समतनुत सारसारं सारज्ञनिधिं तमाश्रये सततम्॥ **151** ॥

श्रीवेङ्कटार्येण कृताः प्रबन्धाः
    सङ्ख्यातुमुर्व्यां विबुधैः न शक्याः।
तत्रैकमेकं परिशीलयन्तो
    धन्या नरास्ते धरणीं पुनन्ति॥ **152** ॥

श्रीरङ्गे शरदश्शतं प्रणिपतन् रङ्गेशपादाम्बुजम्
    स्वस्मिन् भक्तिमतां सतां प्रकटयन् स्वोक्तीः सुधास्यन्दिनीः।
गर्वं च क्षपयन् मुहुः कविघटाकण्ठीरवो वादिनाम्
    श्रीमान् यस्तनयेन साकमवसत् तं वेङ्कटेशं भजे॥ **153** ॥

शुभनयनकपोलं शुभ्रयज्ञोपवीतं
    कमलसदृशपाणिं कान्तबाहान्तराळम्।
उचितपदनिविष्टान् ऊर्ध्वपुण्ड्रान् दधानं
    श्रुतिशिखरगुरुं तं सूरिवन्द्यं भजेऽहम्॥ **154** ॥

वेदान्तदेशिक विभो विनयोपपन्न
    घण्टावतार करुणाकर शान्तिसिन्धो।

श्रीवेङ्कटेश गुरुवर्य कवीशसिंहे
    त्येवं पठंस्तरति संसृतिवारिराशिम्॥ **155**॥

देशिको निगमान्तार्यात् तद्भक्तात् सात्विको जनः।
तत्सूक्तेश्च प्रबन्धोऽन्यो नास्ति नास्ति महीतले॥ **156**॥

अपरिचितसंप्रदायैः अविदितयतिराजसूक्तितत्त्वार्थैः।
अशमितकुदृष्टिगर्वैः अलमलमन्यैरनागमान्तज्ञैः॥ **157**॥

स्मरति निगमचूडादेशिकेन्द्रं मनो मे
    वदति मम निकामं तस्य नामानि जिह्वा।
नमति मम शरीरं तत्पदाब्जे मनोज्ञे
    तदिह परिणतं मे तादृशं भागधेयम्॥ **158**॥

जयति निगमचूडा देशिकेन्द्रो दयाळुः
    जयति सुमतिसेव्या शोभना तस्य सूक्तिः।
जयति शुभगुणं तं शीलयन् सूरिसङ्घः
    जयति वसुमतीयं तस्य सञ्चारधन्या॥ **159**॥

विश्वातिशायने विश्वामित्रगोत्राम्बुधीन्दवे।
विष्णुघण्टावताराय वेङ्कटेशाय मङ्गळम्॥ **160**॥

कल्याणगुणभूषाय कामितार्थप्रदायिने।
कमनीय शरीराय कविसिंहाय मङ्गळम्॥ **161**॥

वेदचूडा परिष्कार सूक्तिमालां वितन्वते।
वेदचूडार्यवर्याय विबुधेन्द्राय मङ्गळम्॥ **162**॥

स्वजिह्वाग्र समासीन तुरङ्गानन हेषितैः।
सुनिरस्त विपक्षाय श्रुत्यन्तार्याय मङ्गळम्॥ **163**॥

मङ्गळाकृतये विश्वमान्याय निधये सताम्।
मत्स्वामिने त्रयीमौळिदेशिकायास्तु मङ्गळम्॥ **164**॥

इतीरितां रसावहां विशुद्धचेतसां सताम्।
त्रयीकिरीटदेशिकेन्द्रवैभवप्रकाशिकाम्॥ **165**॥

समस्तकल्मषापहां सकृत् पठन्ति ये नराः।
तरन्ति ते भवाम्बुधिं क्षमादयाशमान्विताः॥ **166**॥

संपूर्णा निगमान्तार्यवैभवस्य प्रकाशिका।
श्रीनिवासमहासूरिरचिता बुधसम्मता॥ **167**॥

॥ इति श्री वेदान्तदेशिकवैभवप्रकाशिका स्तोत्रं समाप्तम्॥